श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ द्वाविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्वाविंशः सर्गः ॥

## यमरावणयोर्युद्धं यमेन रावणवधार्थमुत्थापितस्य कालदण्डस्य ब्रह्मण आज्ञया निवर्तनं विजयिनो रावणस्य यमलोकात् प्रस्थानं च

स तस्य तु महानादं श्रुत्वा वैवस्वतः प्रभुः।
शत्रुं विजयिनं मेने स्वबलस्य च सङ्क्षयम्॥ **7.22.1** ॥

स हि योधान् हतान् मत्वा क्रोधसंरक्तलोचनः।
अब्रवीत् त्वरितः सूतं रथो मे उपनीयताम्॥ **7.22.2** ॥

तस्य सूतस्तदा दिव्यमुपस्थाप्य महारथम्।
स्थितः स च महातेजा अध्यारोहत तं रथम्॥ **7.22.3** ॥

प्रासमुद्गरहस्तश्च मृत्युस्तस्याग्रतः स्थितः।
येन सङ्क्षिप्यते सर्वं त्रैलोक्यमिदमव्ययम्॥ **7.22.4** ॥

कालदण्डस्तु पार्श्वस्थो मूर्तिमानस्य चाभवत्।
यमप्रहरणं दिव्यं तेजसा ज्वलदग्निवत्॥ **7.22.5** ॥

तस्य पार्श्वेषु निच्छिद्राः कालपाशाः प्रतिष्ठिताः।
पावकस्पर्शसङ्काशः स्थितो मूर्तश्च मुद्गरः॥ **7.22.6** ॥

ततो लोकत्रयं क्षुब्धमकम्पन्त दिवौकसः।
कालं दृष्ट्वा तथा क्रुद्धं सर्वलोकभयावहम्॥ **7.22.7** ॥

ततस्त्वचोदयत् सूतस्तानश्वान् रुचिरप्रभान्।
प्रययौ भीमसन्नादो यत्र रक्षःपतिः स्थितः ॥ 7.22.8 ॥

मुहूर्तेन यमं ते तु हया हरिहयोपमाः।
प्रापयन् मनसस्तुल्या यत्र तत् प्रस्तुतं रणम् ॥ 7.22.9 ॥

दृष्ट्वा तथैव विकृतं रथं मृत्युसमन्वितम्।
सचिवा राक्षसेन्द्रस्य सहसा विप्रदुद्रुवुः ॥ 7.22.10 ॥

लघुसत्त्वतया ते हि नष्टसंज्ञा भयार्दिताः।
नेह योद्धुं समर्थाः स्म इत्युक्त्वा प्रययुर्दिशः ॥ 7.22.11 ॥

स तु तं तादृशं दृष्ट्वा रथं लोकभयावहम्।
नाक्षुभ्यत दशग्रीवो न चापि भयमाविशत् ॥ 7.22.12 ॥

स तु रावणमासाद्य व्यसृजच्छक्तितोमरान्।
यमो मर्माणि सङ्क्रुद्धो रावणस्य न्यकृन्तत ॥ 7.22.13 ॥

रावणस्तु ततः स्वस्थः शरवर्षं मुमोच ह।
तस्मिन् वैवस्वतरथे तोयवर्षमिवाम्बुदः ॥ 7.22.14 ॥

ततो महाशक्तिशतैः पात्यमानैर्महोरसि।
नाशक्नोत् प्रतिकर्तुं स राक्षसः शल्यपीडितः ॥ 7.22.15 ॥

एवं नानाप्रहरणैर्यमेनामित्रकर्षिणा।
सप्तरात्रं कृतः सङ्ख्ये विसंज्ञो विमुखो रिपुः ॥ 7.22.16 ॥

तदाऽऽसीत् तुमुलं युद्धं यमराक्षसयोर्द्वयोः।
जयमाकाङ्क्षतोर्वीर समरेष्वनिवर्तिनोः ॥ 7.22.17 ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
प्रजापतिं पुरस्कृत्य समेतास्तद्रणाजिरे ॥ **7.22.18** ॥

संवर्त इव लोकानां युध्यतोरभवत् तदा।
राक्षसानां च मुख्यस्य प्रेतानामीश्वरस्य च ॥ **7.22.19** ॥

राक्षसेन्द्रोऽपि विस्फार्य चापमिन्द्राशनिप्रभम्।
निरन्तरमिवाकाशं कुर्वन् बाणांस्ततोऽसृजत् ॥ **7.22.20** ॥

मृत्युं चतुर्भिर्विशिखैः सूतं सप्तभिरार्दयत्।
यमं शतसहस्रेण शीघ्रं मर्मस्वताडयत् ॥ **7.22.21** ॥

ततः क्रुद्धस्य वदनाद् यमस्य समजायत।
ज्वालामाली सनिःश्वासः सधूमः कोपपावकः ॥ **7.22.22** ॥

तदाश्चर्यमथो दृष्ट्वा देवदानवसन्निधौ।
प्रहर्षितौ सुसंरब्धौ मृत्युकालौ बभूवतुः ॥ **7.22.23** ॥

ततो मृत्युः क्रुद्धतरो वैवस्वतमभाषत।
मुञ्च मां समरे यावद्धन्मीमं पापराक्षसम् ॥ **7.22.24** ॥

नैषा रक्षो भवेदद्य मर्यादा हि निसर्गतः।
हिरण्यकशिपुः श्रीमान् नमुचिः शम्बरस्तथा ॥ **7.22.25** ॥

निसन्दिर्धूमकेतुश्च बलिर्वैरोचनोऽपि च।
शम्भुर्दैत्यो महाराजो वृत्रो बाणस्तथैव च ॥ **7.22.26** ॥

राजर्षयः शास्त्रविदो गन्धर्वाः समहोरगाः।
ऋषयः पन्नगा दैत्या यक्षाश्च ह्यप्सरोगणाः ॥ **7.22.27** ॥

युगान्तपरिवर्ते च पृथिवी समहार्णवा।
क्षयं नीता महाराज सपर्वतसरिद्रुमा ॥ **7.22.28** ॥

एते चान्ये च बहवो बलवन्तो दुरासदाः।
विनिपन्ना मया दृष्टाः किमुतायं निशाचरः॥ **7.22.29** ॥

मुञ्च मां साधु धर्मज्ञ यावदेनं निहन्म्यहम्।
नहि कश्चिन्मया दृष्टो बलवानपि जीवति॥ **7.22.30** ॥

बलं मम न खल्वेतन्मर्यादैषा निसर्गतः।
स दृष्टो न मया काल मुहूर्तमपि जीवति॥ **7.22.31** ॥

तस्यैवं वचनं श्रुत्वा धर्मराजः प्रतापवान्।
अब्रवीत् तत्र तं मृत्युं त्वं तिष्ठेनं निहन्म्यहम्॥ **7.22.32** ॥

ततः संरक्तनयनः क्रुद्धो वैवस्वतः प्रभुः।
कालदण्डममोघं तु तोलयामास पाणिना॥ **7.22.33** ॥

यस्य पार्श्वेषु निहिताः कालपाशाः प्रतिष्ठिताः।
पावकाशनिसङ्काशो मुद्गरो मूर्तिमान् स्थितः॥ **7.22.34** ॥

दर्शनादेव यः प्राणान् प्राणिनामपि कर्षति।
किं पुनः स्पृशमानस्य पात्यमानस्य वा पुनः॥ **7.22.35** ॥

स ज्वालापरिवारस्तु निर्दहन्निव राक्षसम्।
तेन स्पृष्टो बलवता महाप्रहरणोऽस्फुरत्॥ **7.22.36** ॥

ततो विदुद्रुवुः सर्वे तस्मात् त्रस्ता रणाजिरे।
सुराश्च क्षुभिताः सर्वे दृष्ट्वा दण्डोद्यतं यमम्॥ **7.22.37** ॥

तस्मिन् प्रहर्तुकामे तु यमे दण्डेन रावणम्।
यमं पितामहः साक्षाद् दर्शयित्वेदमब्रवीत्॥ **7.22.38** ॥

वैवस्वत महाबाहो न खल्वमितविक्रम।
न हन्तव्यस्त्वयैतेन दण्डेनैष निशाचरः॥ **7.22.39** ॥

वरः खलु मयैतस्मै दत्तस्त्रिदशपुङ्गव।
स त्वया नानृतः कार्यो यन्मया व्याहृतं वचः॥ **7.22.40** ॥

यो हि मामनृतं कुर्याद् देवो वा मानुषोऽपि वा।
त्रैलोक्यमनृतं तेन कृतं स्यान्नात्र संशयः॥ **7.22.41** ॥

क्रुद्धेन विप्रमुक्तोऽयं निर्विशेषं प्रियाप्रिये।
प्रजाः संहरते रौद्रो लोकत्रयभयावहः॥ **7.22.42** ॥

अमोघो ह्येष सर्वेषां प्राणिनाममितप्रभः।
कालदण्डो मया सृष्टः पूर्वं मृत्युपुरस्कृतः॥ **7.22.43** ॥

तन्न खल्वेष ते सौम्य पात्यो रावणमूर्धनि।
नह्यस्मिन् पतिते कश्चिन्मुहूर्तमपि जीवति॥ **7.22.44** ॥

यदि ह्यस्मिन् निपतिते न म्रियेतैष राक्षसः।
म्रियते वा दशग्रीवस्तदाप्युभयतोऽनृतम्॥ **7.22.45** ॥

तन्निवर्तय लङ्केशाद् दण्डमेतं समुद्यतम्।
सत्यं च मां कुरुष्वाद्य लोकांस्त्वं यद्यवेक्षसे॥ **7.22.46** ॥

एवमुक्तस्तु धर्मात्मा प्रत्युवाच यमस्तदा।
एष व्यावर्तितो दण्डः प्रभविष्णुर्हि नो भवान्॥ **7.22.47** ॥

किं त्विदानीं मया शक्यं कर्तुं रणगतेन हि।
न मया यद्ययं शक्यो हन्तुं वरपुरस्कृतः॥ **7.22.48** ॥

एष तस्मात् प्रणश्यामि दर्शनादस्य रक्षसः।
इत्युक्त्वा सरथः साश्वस्तत्रैवान्तरधीयत॥ **7.22.49** ॥

दशग्रीवस्तु तं जित्वा नाम विश्राव्य चात्मनः।
आरुह्य पुष्पकं भूयो निष्क्रान्तो यमसादनात्॥ **7.22.50** ॥

**स तु वैवस्वतो देवैः सह ब्रह्मपुरोगमैः।**
**जगाम त्रिदिवं हृष्टो नारदश्च महामुनिः॥ 7.22.51॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्वाविंशः सर्गः॥